No. ४४४८

Title ब्रह्मत्व पद्धतिः

Author ०

Extent ६ Age ०

Subject सूत्र पद्धतिः

ब्रह्मत्वपद्धतिः

४४४७

4447

F. = 6

ब्रह्मजपद्धति

९०

॥ श्रीगणेशाय नमः ॥ ॐ गणाधिपं नमस्कृत्य श्रीगुरोश्चरणांस्तथा । ब्रह्मत्वपद्धतिं वक्ष्ये ला
टसूत्रानुसारतः ॥१॥ शाख्यायणं वलाटं च मखवृत्तिमेव च। करिष्येहं यथाप्रज्ञं ब्रह्मत्वस्यात्र प
द्धतिं ॥ २॥ अथ ॥ सर्वत्र ब्रह्मा दक्षिणत उदङ्मुखः कुर्याद्धोमेभ्योन्यत्। इत्युक्तमस्ति। सर्वत्र सर्वकर्म
सु ब्रह्मा स्मार्ते श्रौते च अग्नेर्दक्षिणत उदङ्मुख उपविष्टः सन् कर्म कुर्यात्। प्रायश्चित्तार्थीयत्र यत्र होमः
३ स्यात् अन्योपि होमः तत्र प्राङ्मुख आसीनो जुहुयात्। एकाग्निसाध्याः पाकयज्ञाः तेषु यद्योक्तप्रका
रेण उपवेशनं। यजुः शाखिनां स्मार्ते सूत्रगवः पशुतन्त्रः। सपत्नानुष्ठीयते तत्र यथाविधानं स्मार्त्त ब्र०
मासनं। यदा रण्यबलिं हरन्ति तदानुगच्छेत् निधीयमानानां दक्षिणतः स्थित्वा निहितेषु उपस्पृश १

अनपेक्षं हि प्रत्याव्रजेत्। सर्वेषु पाकयज्ञेषु या दक्षिणा पूर्णपात्रादि तां तूष्णीं प्रतिगृह्णीयात्। पशोः
पशुरेव दक्षिणा। सर्वकर्मसु अनादेशे अग्निशालायां पूर्वद्वारा प्रवेशनं। ॥ अथ श्रौताताधानं॥
श्रौताधानादौ पूर्वं मातृपूजनं वृद्धिश्राद्धं च। ततः ब्रह्मादीनामृत्विजां वरणं। अमुकसगोत्रं अमुक
शर्मन् नित्यनैमित्तिककाम्यकर्मार्थं वितानानग्नीनहमाधास्ये तत्र मे त्वं ब्रह्मा भव। ओं भवामीति ब्रह्मा ब्रू
यात्। एवं होताध्वर्युरग्नीन्। ततः गृह्योक्तोर्घविधिः। ततः पूजासंकल्पः भोजनसंकल्पः। पुण्याहवाच
नं। इत्यादि। ततः अग्निस्थापनं क्रियते। तत्रोपवेशनं। ततः अरणिप्रदानं॥ तत्र दक्षिणतः उदङ्मुखोप
वेशनं। आशीर्वादादि ततः चातुष्प्राश्यं चेत्। तदा निर्वपणकाले तूष्णीमुपवेशनं तत्र एवमुक्तं यजुषेति

१ त्रयो मंत्रा उपवेशने। तूष्णीमेकेन मंत्रेण आसीत ततिकिंचोन। निरुमेष्यपार्थे दक्षिणया द्वारा प्रप
द्य एष संचरः। चातुष्प्राश्यपह विहरणकाले एवमेव दक्षिणया द्वारा प्रपद्य तूष्णीमुपवेशनं। तूष्णी
मुपवेशनप्रकरः। ब्रह्मसना त्रिणं गृहीत्वा सव्येन निरस्तः परावसुः दक्षिणतः तृणं निरस्यति। उदकोपः
उपवेशनं प्राशनकाले तस्मादन्नाहोदनं गृहीत्वा भूमौ प्रक्षिपेयुः नेष्टा विद्धं कृता निष्कृत्रनेन मंत्रेण॥
2 आश्वष्ठी समिद्धोमानंतरं तदन्नं प्राश्नीयुः। तस्मिन्नेवा श्वो प्रहरे हितिवा। ततः प्रभाते स्नानादिकं
आचमनं पवित्रमाणिः। ततः दक्षिणेन अग्न्यायतनानि गत्वा यस्मिन् स्थानेऽग्निमंथनं क्रियते तत राम०
त्र गत्वा ब्रह्मासना तृणं गृहीत्वा निरस्तः परावसुः दक्षिणात् तृणं निरस्यति। उदकोपः आवसोः सदने सी २

व २

ग्गायेत्। अग्निं नर इति पूर्वं

१३

द्यामीत्युपविशेत्। भूर्भुवः स्वर्बृहस्पतिर्ब्रह्माहं मानुषेभ्यः। इत्युपविश्य जपेत्। एतद्यजुषोपवेशनानां मंथनस
मये अरणी आलभ्य ब्रह्मा अरण्योः। एतत्साम गायेत्। अरण्योरिति राक्षोघ्नं साम अग्नेर्वैश्वानर ऋषिः त्रि
ष्टुप्छंदः अग्निर्देवता अग्निमंथने विनियोगः। ततः मथ्यमाने अग्निं नर इत्येतयोः पूर्वं गायेत्। अग्निं न
त्येतयोः रई पूर्वं मरुत्साम राशिमराय ऋषिः त्रिष्टुप्छंदः अग्निर्देवता मथ्यमाने विनियोगः। धूमे जाते त्वे
बमधूमश्रवतीति यामं साम। यम ऋषिः। अनुष्टुप्छंदः अग्निर्देव० धूमे उदिते वि० जाते रथंतरम्॥ ॥
अभि त्वा शूर नोनुम इति रथंतरं साम। वसिष्ठ ऋषिः ककुबुत्तरा बृहती छंदः इंद्रो देवता जाते ग्नौ विनियोगः।
प्रज्वलिते दशिंगा त्विति। अदर्शिगा तु वित्तम इति गाथिनं साम। गाथि ऋषिः बृहती छंदः अग्निर्देवता प्र

०८१

३ ज्वलितेग्नौविनि० गार्हपत्योनिधायमानेउत्तरंगवांव्रतंगायेत्। अग्निमीडेपुरोहितमित्युत्तरंगवांव्रतं
साम। गावोऋषयः। गायत्रीछंदः। अग्निर्देवता। गार्हपत्येनिधीयमानेविनि० आहवनीयंप्रतिक्रीय
यमाणेवामदेव्यंगायेत्। कयानश्चित्रआभुवदितिवामदेव्यंसाम। वामदेवऋषिः। गायत्रीछंदः। वि
श्वेदेवादेवताः। क्रीयमाणेविनियोगः। बृहन्निहितेगायेत्। त्वामिद्धिहवामहइतिबृहत्साम। भरद्वाजऋ
षिः ककूत्तराबृहतीछंदः इंद्रोदेवता आहवनीयेनिधीयमानेविनियोगः। बृहद्वामदेव्यरथंतराणि
त्रिचेषुगायेत्। इतराणिसकृत्सकृद्गायेत्। अन्येपिबहवोविकल्पाः। आहवनीयेनिधायमानेग्नौब्रह्मा
दक्षिणतः उदङ्मुखस्तिष्ठेत्स्थापितेग्नौयजुषोपदिशेत्। यजुषोपवेशनप्रकारः पूर्ववत्। ततः पूर्णाहु

ति होम:। ततः सम्पस्पमंथनं। तत्र तूष्णीमुपवेशनं। घृते कृते यथार्थकर्म। समेन जयामि विषमे ण
नीयसे अनेन मंत्रेण घृतकर्म। ततः। इष्टिर्विनयं॥ तासां प्रथमा पवमानेष्टि:। ब्रह्मवरणं कृतये
न कृतये वा तथापि आहवनीयं पूर्वेण परीत्य दक्षिणत उदङ्मुखः यजुषोपवेशनं। प्रणीताप्रणयना
न ब्रह्मणवाग्यमनं हविष्कृदेहीत्युक्ते वाग्विसर्गः। तावत्कालं मौनं। अन्येषु बहवो विकल्पाः। यदाध्वर्यु
णा ब्रह्मन्नपः प्रणेष्यामीत्युक्ते ब्रह्मा एवं ब्रूयात् सवितृप्रसूतोऽपः प्रणय भूर्भुवः स्वर्बृहस्पतिर्ब्रह्माहं मा
नुषस्तु इ्म्पः १ अध्वर्युना ब्रह्मन् हविः प्रोक्षिष्यामीत्युक्ते। सवितृप्रसूतो हविः प्रोक्ष भूर्भुवः। अध्व
र्युणा ब्रह्मन् पूर्वपरिग्रहं परिगृहीष्याः सवितृप्रसूतः पूर्वपरिग्रहं परिग्रहण। भूर्भुं॰ अध्वर्युणा ब्रह्मन्नु

४ त्तरं परिग्रहं परिगृहीष्यामीत्युक्ते। सविन्द उत्तरं परिग्रहं परिग्रहाणां भूर्भुवः०। अध्वर्युणा ब्रह्मन्निध्मं प्रो
क्षिष्यामीत्युक्ते। सवितः इध्मं प्रोक्षस्व। अध्वर्युणा ब्रह्मन्बर्हिः प्रोक्षिष्यामीत्युक्ते। सवितः प्रसूतो बर्हिः
प्रोक्षभू०६ ततः होत्रा ब्रह्मन्सामिधेनीरनुवक्ष्यामीत्युक्ते। सवितृतः सामिधेनीरनुब्रूहि ८। स्विष्ट
कृति कृते सति उदकोपस्पर्शनं। मित्रस्य त्वेति प्राशित्रावेक्षणं। उत्थाय आचमनं। स्वासने उपवि
५ श्य देवस्य त्वेति प्रतिग्रहणं वेदः। त्वष्टानि ब्रुह्याणुरस्ताहृदं सादयेत् पृथिव्यास्त्वा नाभौ सादयामीत्य
नेन मन्त्रेण। अनामिकांगुष्ठेन गृहीत्वा उत्थाय बहिर्गत्वा अग्नेष्ट्वास्येन प्राश्नामीति प्राश्नीयात्। असंख्वा राम०
दं निगिरेत्। आचमनं इंद्रस्य त्वा जठरे सादयामीत्यनेन उरसि पाणिं निदधीत। उदकोपः स्वासने ४

उपविश्य प्राशित्रहरणं प्रक्षाल्य उदकेन निदध्यात्। इडान्वीमः। चतुर्द्धाकरणभागस्य भक्षः। इडा
संबंधिभक्षः। आचमनं। आपोहिष्ठेति मार्जनं। सान्नाय्ययाजिनो अमावास्यायां दोहनपवित्रे
मार्जयेद्रत्। ब्रह्मभागमन्वाहृत प्राशित्रहरणे उपनिदधीत॥ तमिष्टोसंज्ञप्ति तायां प्राश्नीया
त्। दक्षिणाप्रतिग्रहः॥ अथ मायानि शौ प्रजापतेर्भागास्थो ऊर्जस्वतः पयस्वंतोक्षितास्थोक्षि
त्यैवः प्राणापानौ मेपात समानव्यानौ मे पातोदानरूपे मे पात धेन्वनडुहत्सतरीवत्सतराजप
र्णपात्राणि स्थो ऊर्जं मयि धत्त। अनेन मंत्रेण दक्षिणान्वारंभः। ततो यजमानवाचनं॥ प्र
जापतिं स्वपासमक्षाद्दधम समामागम्याधेन्वनडुहत्सतरीवत्सतराजपर्णपात्राणि ददानि ब्रह्मन्

५ ब्रह्मासि ब्रह्मणे त्वा कुताद्य मा मा हिंसीः मोर दकु तोमह्य शिवो भवेत् इति । ब्रूहि ततो यजमानः
प्रजापतिं त्वयेत्यारभ्य शिवोऽ इत्येतद्वर्तं पठेत् । ॐ भूर्भुवः स्वः अनेन दक्षिणा प्रतिग्रहः । यज
मानेन दक्षिणा दातव्या । आस्याः अदितेष्टेः सहा धर्म्यं धेनुं अनड्वाहं वत्सतरी वत्सतरं अजा
पूर्णपात्रं दक्षिणाः । ब्रह्मणे होत्रे अध्वर्यवे आग्नीध्रेवसम विभागे नाहं संप्रददे । ब्रह्मन्नूयसो भागः
स प्रतिगृह्यतां इत्यादि सर्वेभ्यः मयापि दत्ता पत्नी ब्रूयात् ततः प्रतिग्रहः ततः अध्वर्युणा ब्रह्मन्नस्त्वा
स्वामीत्युक्ते ब्रह्मा जपति । देवस्य वितरेतत्ते इत्यतआरभ्य स्वइहमादयं । तामित्यं नं उपांशु प्रति राम०
ष्ठ इत्युच्चैः । भूर्भुवः स्वर्बृहस्पति र्ब्रह्माहं मानुषः उपांशु । उ इन्द्र इत्युच्चैः । अवांतरेला भक्षः आज्यस्य ५

6

मार्जनं पिष्टलेपहोमानंतरं ब्रह्मा प्रायश्चित्तं कुर्यात्। भूः स्वाहेति गार्हपत्ये भुवः स्वाहेति दक्षिणा
ग्नौ। स्वः स्वाहेति आहवनीये। भूर्भुवः स्वः स्वाहेति च। स्वासने उपविश्य चेष्टता कार्यप्रायश्चित्तं
६ इति ब्रूयात्। विमुक्तासु प्रणीतासु आहवनीये समिदाधानत्रयं। एधोस्येधिषीमहीति प्रथमां। स
मिदसि समेधिषीमहीति द्वितीयां यदेनश्चकृमा वयं यद्वान्यकृत मारिमानया समिधा वेद सर्वं २४
तदपमृष्ट्यमह इति तृतीयां तमेवोपतिष्ठेरन्। अयोऽग्ना न्वचारिषं रसेन समगस्महि। पयस्वान
ग्न आगमं तं मा संसृज वर्चसेत्याति। ततो ब्रह्मभागभक्षः॥ इति प्रथमा हविः॥ ततः द्वितीया तन्त्र
हविः तस्मिन्नेव मेव ब्रह्मत्वं। आदौ यजुषोपवेशन विकल्पः॥ दक्षिणा प्रजापतेर्भागो स्योर्जस्वंतः प राम

६